ग्रांटिक

क्र. नं. ११५

पुण्याहावाचन

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

३७४१

(1)

॥श्री॥ अग्निमीळे॥ प्रारंभ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

ऋ०
१

(२)

श्रीनृसिंहायनमः॥ ॥हरिः ॐ॥ ॥अग्निमीळेपुरोहितंय
ज्ञस्यदेवमृत्विजं॥होतारंरत्नधातमं॥अग्निःपूर्वेभिर्ऋषिभिरीड्यो
नूतनैरुत॥सदेवाँएहवक्षति॥अग्निनारयिमश्नवत्पोषमेवदिवेदि
वे॥यशसंवीरवत्तमं॥अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि॥सइ
द्देवेषुगच्छति॥अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः॥देवोदेवे
भिरागमत्॥१॥यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि॥तवेत्तत्सत्यमंगि
रः॥उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयं॥नमोभरंतएमसि॥राजंत
मध्वराणांगोपामृतस्यदीदिविं॥वर्धमानंस्वेदमे॥सनःपितेवसून १
वेग्नेसूपायनोभव॥सचस्वानःस्वस्तये॥२॥वायवायाहिदर्शतेमेसोमाअ
रंकृताः॥तेषांपाहिश्रुधीहवं॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

अथपुण्याहवाचनं ॥ महीद्यौः पृथिवीचन० ॥ ऋ १ ओषधयः संव
दंते० ॥ ऋ १ आकलशेषुधावति० ॥ ऋ १ २ मंमेगंगेयमुने० ॥ ऋ १ गंधद्वा
रांदुराधर्षांनित्यपुष्टांकरिषीणीं ॥ ० ॥ कांडात्कांडात्प्ररोहंती परुषःपरुषः पाओ०
परि ॥ एवानोदूर्वेप्रतनु सहस्रेणशतेनच ॥ अश्वत्थेवो
निषदनंपर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सनव
थपूरुषं ॥ सहिरत्नानिदाशुषे० ॥ सुवासुवासाः० ॥ ऋ १ ॥ पूर्णा
दर्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाइषमूर्जं
शतक्रतो ॥ तत्वायामिशुनःशेपोवरुणःत्रिष्टुप् ॥ उत्तरक
लशेवरुणावाहनेविनियोगः ॥ तत्वायामिब्रह्मणा० ॥ ऋ १ व
रुणायनमः ॥ आवाहयामि ॥ वरुणायनमः ॥ आसनं० ॥ वरुणाय० ॥

स्यो० या: फ०
ऋ २ ऋ २

पू०न्र

२

(3)

पाद्यं०॥ वरुणायनमः॥ अर्घ्यंस०॥ वरुणाय०॥ आचमनीयं०॥ वरुणाय०॥
स्नानंस०॥ वरुणाय०॥ वस्त्रार्थे उपवीतार्थे अलंकारार्थे अक्षतांत्स
मर्पयामि॥ वरुणाय० गंधं०॥ वरुणाय०॥ अक्षतान्स०॥ वरुणाय०॥
पुष्पं०॥ वरुणाय०॥ धूपंस०॥ वरुणाय०॥ दीपं०॥ वरुणायनमः॥
नैवेद्यं०॥ वरुणाय० तांबूलं०॥ वरुणाय०॥ दक्षिणान्स०॥ तत्वा
यामिब्रह्मणावंदमानस्तदाशास्ते यजमानो हविर्भिः॥ अहे
ळमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ वरुणाय०
मंत्रपुष्पं०॥ [illegible] कलशास्यमुखे०॥ ओ
यांतु मम शांत्यर्थं दुरितक्षयकारकाः॥ मातृदेवो भव॥ पितृ
देवो भव॥ आचार्यदेवो भव॥ अतिथिदेवो भव॥ ततः आशि
षः प्रार्थयंते प्रार्थना माह॥ एताः सत्याः आशिषः संतु॥ अव २

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)

निहतजानुमंडलः कमलमुकुलसदृशीं मंजलीं शिरस्याधाय दक्षिणे
न पाणिना सुवर्णपूर्णकलशं धारयित्वा॥ दीर्घा नागा नद्यो गिरयस्त्री
णि विष्णुपदानि च तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु॥ शिवा
आपः संत्विति भवंतो ब्रुवंतु॥ शिवा आपः संतु॥ सौमनस्यमस्त्विति
भवंतो ब्रुवंतु॥ सौमनस्यमस्तु॥ अक्षतं चारिष्टं चास्त्विति भवं०॥ अ
क्षतं चारिष्टं चास्तु॥ गंधाः पांत्विति भवंतो ब्रुवंत्विति भव०॥ गंधाः
पांतु सुमंगल्यं चास्तु॥ अक्षताः पांतु आयुष्यमस्त्विति भवं०॥
अक्षताः पांतु आयुष्यमस्तु॥ पुष्पाणि पांतु सौश्रीयमस्त्विति भवं०
पांतु पुष्पाणि सौश्रीयमस्तु॥ तांबूलानि पांत्विति भव०॥ तांबूलानि
पांतु ऐश्वर्यमस्तु॥ दक्षिणाः पांतु बहुधेयं चास्त्विति भवं०॥
दक्षिणाः पांतु बहुधेयं चास्तु॥ दीर्घमायुः श्रीयः शांतिः पुष्टिरस्तु

पू॰च॰

३ ष्टिश्चास्तु ॥ श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु ॥ यं कृत्वा सर्ववे
दद्देवयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते तमहमोंकार
(4) मादिं कृत्वा ॥ ऋग्युजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भिर
नुज्ञातः पुण्याहं वाचयिष्ये ॥ वाच्यतां ॥ भद्रंकर्णेभिः शृणुयाम देवा० ॥
ऋ१ द्रविणोदाद्र० ॥ ऋ१ सविता पश्चातात् ॥० ऋ१ नवो नवो भवति जाय
मानो० ॥ ऋ१ उच्चा दिवि दक्षिणा० ॥ ऋ१ आपउंदंतु जीवसे दीर्घायुत्वा
य वर्चसे ॥ यत्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि ॥ जात
वेदो यशो० ऋ१ अश्विनं सपुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥
संत्वा सिंचामि यजुषा प्रजामायुर्धनं च ॥ व्रतनियमतपःस्वाध्याय
दत्त क्रतुदानविशिष्टानां ब्राह्मणानां मनः समाधीयतां ॥ समाहितमनस
स्मः ॥ प्रसीदंतु भवंतः ॥ प्रसन्नाः स्मः ॥ शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टि

Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ऋद्धिरस्तु २ आयुष्य० अरोग्य० धर्मसम०

पुत्र० धनधा न्यस० २ रभि (5A)

रस्तु ॥ वृद्धिरस्तु ॥ अविघ्नमस्तु ॥ शिवं कर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ वेद
समृद्धिरस्तु ॥ शास्त्रसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ अरिष्टनिरसनम
स्तु ॥ यत्पापं तत्प्रतिहतमस्तु ॥ यच्छ्रेयस्तदस्तु ॥ उत्तरे कर्मण्यविघ्नमस्तु ॥
उत्तरोत्तरमहरहर्वृद्धिरस्तु ॥ उत्तरोत्तराः क्रियाः शोभनाः संपद्यंतां ॥ शुभाः
तिथिकरणमुहूर्तनक्षत्रसंपदस्तु ॥ तिथिकरणमुहूर्तनक्षत्रग्रहल
ग्नादिदेवताः प्रीयंतां ॥ तिथिकरणमुहूर्तनक्षत्रे सग्रहे सदैवते प्रीये
तां ॥ दुर्गापांचाल्यौ प्रीयेतां ॥ २४ ॥ अग्निपुरोगा विश्वेदेवाः प्रीयंतां ॥ २५
इंद्रपुरोगा मरुद्गणाः प्रीयंतां ॥ २६ ॥ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां ॥ २७ ॥ वे
विष्णुपुरोगाः सर्वे देवाः प्रीयंतां ॥ २८ ॥ माहेश्वरीपुरोगा उमामातरः
प्रीयंतां २९ ॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां ॥ ३० ॥ अरुंधतीपुरो
गा एकपत्न्यः प्रीयंतां ॥ ३१ ॥ ऋषयः छंदांस्याचार्या वेदा देवा यज्ञाश्च

"a joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

पुण्यव

प्रियंतां ॥३२॥ ब्रह्मच ब्राह्मण्याश्च प्रीयंतां ॥३३॥ श्रीसरस्वत्यौ प्रीयेतां ॥३४॥
४ श्रद्धामेधे प्रीयेतां ॥ भगवती कात्यायनी प्रीयेतां ॥ भगवती माहेश्वरी प्री
(5) येतां ॥ भगवती शांतिकरी प्रीयतां ॥ भगवती पुष्टिकरी प्रीयतां ॥ भगवती गर
तुष्टिकरी प्रीयतां ॥ भगवती ऋद्धिकरी प्रीयंतां भगवती वृद्धिकरी प्री
यंतां ॥ भगवंतौ विघ्नविनायकौ प्रीयेतां ॥ भगवान् स्वामी महासेनः
६ ससूतः सपत्नीकः सपार्षदः सर्वस्थानगतः प्रियंतां ॥ हरिहरहिरण्यगर्भाः
प्रीयंतां ॥ सर्वा ग्रामदेवताः प्रीयंतां ॥ सर्वाः कुलदेवताः प्रियंतां ॥
हता ब्रह्मद्विषः ॥ हताः परिपंथिनः ॥ हतास्य कर्मणो विघ्नकर्तारः ॥
शत्रवः पराभवं यांतु ॥ शाम्यंतु घोराणि ॥ शाम्यंतु पापानि ॥ शाम्यं
त्वीतयः ॥ शुभानि वर्धंतां ॥ शिवा आपः संतु ॥ शिवा ऋतवः संतु ॥ शि
वा अग्नयः संतु ॥ शिवा आहुतयः संतु ॥ शिवा ओषधयः संतु ॥ ४

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

शिवावनस्पतयः संतु ॥ अहोरात्रे शिवे स्यातां ॥ निकामे निकामेनः पर्ज
न्यो वर्षतु फलिन्यो न ओषधयः पच्यंतां ॥ योगःक्षेमो नः कल्पतां ॥
बृहस्पति २ शुक्रांगारकबुधशनैश्चरराहुकेतुसोमसहितआदित्यपुरोगा
सर्वे ग्रहाः प्रीयंतां ॥ भगवान्नारायणः प्रीयतां ॥ भगवान्पर्जन्यः प्री
यतां ॥ भगवान्स्वामी महासेनः पुण्याहकालान्वाचयिष्ये ॥ वाच्य
तां ॥ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ॥
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने [illegible] भद्रमावद वि
श्वतो नः शकुने पुण्यमावद ॥ या ज्योत्या पुजति प्रतिवें॰ ॥ यस्तु पुण्यं
नक्षत्रं लब्ध्वा कुर्वीतोपविश ॥ यदा वै सूर्य उदेति ॥ अथ नक्षत्रं नै
ति ॥ यावति तत्र सूर्यो गच्छेत् ॥ यत्र जघन्यं पश्येत् ॥ तावत्कुर्वीत
यत्कारी स्यात् ॥ पुण्याह एव कुरुते ॥ महासहकुटुंबिने माहाज
× लानि वा एतानि यमनक्षत्राणि ॥ यान्येव देवनक्षत्राणि ॥ तेषु कुर्वीत यत्कारी स्यात्
पुण्याह एव कुरुते ॥ १

नत्नमस्कुर्वाणाय ॥ आशीर्वचमेनेपेक्षमाणायमुकशर्मणः पुण्याहं
भवंतोब्रुवंतु ॥ इतित्रिर्बदेत् ॥ स्वस्तयेवायुमुपु० ॥ ऋ १ आदित्यमु
द्यनीयः पथ्यैयेवेतः स्वस्त्या प्रयंतिपथ्यां स्वस्तिमभ्युद्यंतिस्वस्त्ये
(6) वेतः प्रयंतिस्वस्तिमुद्यंतिस्वस्तिद्यंति ॥ स्वस्तिनइंद्रोवृद्धश्रवाः० ऋ
अष्टौदेवावसवःसोम्यासः चतस्रोदेवीरजराःश्रविष्ठाः ॥ नेयत्तं
पांतुरजसःपुरस्तात् ॥ संवत्सरीणममृतं स्वस्ति ॥ महांस
हकुटुंबिनेमहाजनानान्नमस्कुर्वाणाय ॥ आशीर्वचनमपेक्षमा
णायमुकशर्मणः स्वस्तिभवंतोब्रुवंतु ॥ इतित्रिर्वदेत् ॥ आ
युष्मतेस्वस्ति ॥ ऋ ध्यामस्तोमं० ॥ ऋ सर्वाम्हद्धिमह्भुयाभि
तितंबैनेजसैवपुरस्तात्पर्य भवछंदोभिर्मध्यतोक्षरैरुप
विष्टाऊयच्यास्सर्वतोद्वादशाहंपरिभूय सर्वाम्हद्धिमाध्नोत्स ५

र्वामृद्धिमृध्नोति य एवं वेद ॥ ऋध्यास्म हव्यैर्नमसोपसद्य ॥ मित्रं देव
मित्रधेयं नो अस्तु ॥ अनुराधान् हविषा वर्धयंतः ॥ शतं जीवेम शर
दः सवीराः ॥ त्रिणि त्रिणि वै देवानामृध्नोणि । त्रीणि छंदांसि ॥ त्री
णि सवनानि ॥ त्रय इमे लोकाः ॥ ऋध्यामेतद्वीर्य एषु लोकेषु प्रतिति व८
(6A) ष्ठति ॥ महां सह कुटुंबिने महाजनाय नमस्कुर्वाणाय आशीर्वचन
मपेक्षमाणाय अमुक शर्मणे ऋद्धिं भवंतो ब्रुवंतु ॥ इति त्रिर्वदेत् ॥ क
र्मऋध्यतां रिद्धिसमृद्धिः ॥ श्रीये जात० ॥ ऋ १ श्रीय एवैनं तच्छ्रि
यामादधा० ॥ य एवं वेद ॥ य[illegible]भ्यजयत्सर्वमेतन्मुं च लो तम
कमिदमु च सर्वं ॥ तन्नो नक्षत्रमभिजिद्विजित्यं ॥ श्रियं दधात्व
हृणीयमानं ॥ अहे बुध्निय मंत्रं मे गोपाय ॥ यमृषयस्त्रैवि
दा विदुः ॥ ऋचः सामानि यजूंषि ॥ सा हि श्रीरमृता सतां ॥

पुण्या०
६

मद्यं सहकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्ष
माणाय अमुकशर्मणः श्रीरस्त्विति भवंतो ब्रुवंतु ॥ इति त्रिर्वदेत् ॥
अस्तु श्रीः मंगलानि भवंतु ॥ वर्षशतं पूर्णमस्तु ॥ गोत्राभिवृद्धि
(३) रस्तु ॥ प्रजापतिः प्रीयतां ॥ शुक्रेभिरंगैरजे आततन्वान्क्रतुं पुनानः
कविभिः पवित्रैः ॥ शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृह
तीरनूनाः ॥ तद्प्येषः श्लोके भिगीतं० ॥ ऋ १ ॥ ततः उत्तरकल
शे दक्षिणहस्तेन दक्षिणकलशं वामहस्ते गृहीत्वा ताभ्यां धाराद्व
त यं संततं पात्रे निषिंचेत् येभिर्मंत्रैः ॥ वास्तोष्पते प्रतिजानीह्य० ॥ ऋ १
वास्तोष्पते प्रतरणो न एधि० ॥ ऋ १ वास्तोष्पते शग्मया० ॥ ऋ १
अमीवहा वास्तोष्पते० ॥ ऋ १ शिवं शिवं ॥ ततः कर्तुमंतः पत्नी वामतः
मुपवेश्य पात्रपातितजलेन पल्लवदूर्वादिभिर्दंपुरव विप्रार ६

the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A) भिषेयुः ॥ तिष्टंतु ॥ तत्र मंत्राः ॥ समुद्रज्येष्टा इति चतसृभिः ॥ ॐ ४ आ
पो हि ष्टेति तिसृभिः ॥ ॐ ३ त्रायंतामिति ॥ ॐ ३ इमा आपः शिवतमा० ॥ ॐ ३
भुं देवस्य त्वेति ॐ १ ॥ भूर्भुवस्वः अमृताभिषेकोस्तु० ॥ इंद्रियं वा एतदस्मि० ॥
खंड ॥ सुरास्त्वामभिषिंचंतु० ॥ पुराणमंत्राः ॥ देवस्य त्वा० ॥ अमृता
भिषेकोस्तु ॥ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं० ॥ ॐ १ अस्तु ॥ गौरी प
द्मा शची मेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मा
तरो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेंद्राणी
चामुंडा सप्त मातरः ॥ गौर्यादि षोडश मातृः ॥ ब्राह्म्यादि सप्त
मातृः ॥ गणपतिं दुर्गां ॥ क्षेत्रपालं ॥ आवाहयामि ॥ नदस्तु
मित्रावरुण० ॥ ॐ १ गृहा वै प्रतिष्ठा सूक्तं तत्प्रतिष्ठितं तमया
वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशून् लभते गृहानेवैनानाजि

७ गमिषति गृहाहि पशूनां प्रतिष्ठा प्रतिष्ठा॥ सुप्रतिष्ठितमस्तु॥ गौर्या
द्यावाहितदेवताभ्यो नमः॥ आसनं॥ पाद्यं॥ अर्घ्यं॥ आचमनीयं॥ स्ना
नं॥ आचमनं॥ वस्त्रं॥ यज्ञोपवीतं॥ गंधं॥ अक्षतान्॥ पुष्पं॥ धुपं॥ दी
(8) पं॥ नैवेद्यं॥ फलतांबूलं॥ दक्षिणा॥ गौरीर्मिमायसलिलानी०॥ ऋक॥
इति मंत्रपुष्पं॥ सत्यवसुसंज्ञिका विश्वेदेवाः नांदिमुखाः॥ भूर्भुवस्वः
पाद्यं स्वाहा नमः यं च वृद्धिः॥ मातृपितामहिप्रपितामह्यः नांदीमुख्यः भू
र्भुवस्वः इदं वः पाद्यं स्वाहा नमः यं च वृद्धिः॥ पितृपितामहप्रपिता
महाः नांदीमुखाः सपत्निकाः॥ भूर्भुवस्वः इदं वः पाद्यं स्वाहा०॥ मा
तामह मातुःपितामह मातुः प्रपितामहाः॥ सपत्निकाः भूर्भुव नांदीमु खाः
स्वः इदं वः पाद्यं स्वाहा नम०॥ सत्यवसुसंज्ञिका विश्वेदेवाः। नांदीमु
खाः भूर्भुवस्वः इदं वः आसनगंधाद्युपचारकल्पनं स्वाहा नमः यं च वृ
द्धिः॥ मातृपितामहीप्रपितामह्यः नांदीमुखाः भूर्भुवस्वः आस ७

(8A)

नगंधाद्युपचारकल्पनं स्वाहा न मम यं च वृद्धिः॥ पितृपितामहप्रपितामहाः
नांदीमुखाः भूर्भुवस्वः आसनगंधाद्युपचारकल्पनं स्वाहा न म
मं च वृद्धिः॥ मातामहमातु पितामहमातुः प्रपितामहाः सपत्नि
काः नांदीमुखाः ३ना आसनगंधाद्युपचारकल्पनं स्वाहा न मम चैयं वृद्धिः॥
सत्यवसु संज्ञिकाः विश्वेदेवाः नांदीमुखाः भूर्भुवस्वः इदं व आसनगंधाद्युपचारकल्प
नं स्वाहा न मम यं च वृद्धिः॥ पितृपितामहप्रपितामहाः नांदीमुखाः
भूर्भुवस्वः इदं वः आसनगं [illegible] ॥ मातामहमातुः पितामहमा
तुः प्रपितामहाः सपत्निकाः नांदीमुखाः भूर्भुवस्वः इदं वः आस
नगंधाः ०॥ सत्यवसुसंज्ञिकाः विश्वेदेवाः नांदीमुखाः भूर्भुव
स्वः युग्मब्राह्मणभोजनपर्याप्तं दास्यमानं मामप्रतिनि
धिभूतं किंचिद्व्यवहारिकद्रव्यं स्वाहा न मम यं च वृद्धिः॥ मातृपिता
यथाशक्तिहिरण्यं स्वाहा॥ आमं यथाशक्ति निष्क्रयद्रव्यं स्वाहा॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सू॰ न्र
८

मह्हि प्र पितामहाः नांदीमुख्यः भूर्भुवस्वः युग्मब्राह्मणभोजनपर्याप्तंदा
स्यमानमामप्रतिनिधिभूतंकित् व्यवाहारिकंद्रव्यंस्वाहा०॥ पितृपिताम
हप्रपितामहाः नांदीमुखाः भूर्भुवस्वः युग्मब्राह्मणभोजनपर्याप्तंदास्यमा
नमामप्रतिनिधिभूतंकित् व्यवाहारिकंद्रव्यंस्वाहा०॥ मातामहमातुःपि
तामहमातुःप्रपितामहाः सपत्निसहिताः नांदीमुखाः भूर्भुवस्वः युग्म
(१) ब्राह्मणभोजनपर्याप्तंदास्यमानमामप्रतिनिधिभूतंकिंचित् व्यवाहारि
कंद्रव्यंस्वाहा०॥ गौर्यादिषोडशमातृः ब्राह्म्यादिसप्तमातृः गणपतिंदु
र्गां क्षेत्रपालंचवः युग्मब्राह्मणभोजनपर्याप्तंदास्यमानमामप्रतिनि
धिभूतंकिंचित् व्यवाहारिकंद्रव्यंस्वाहा०॥ उपास्मैगायतानरःपव
मानायेंदवे॥ अभिदेवांइयक्षते॥ अभितेमधुनापयोथर्वाणोअ
शिश्रयुः॥ देवंदेवायदेवयु॥ सनःपवस्वशंगवेशंजनायशमर्वते॥ ८

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

शं राजन्नोषधीभ्यः॥ बभ्रवे तु स्वलवसेरणाय दिविस्पृशे॥ सोमाय गा
थमर्चत॥ हस्तच्युतेभिरद्रिभिः स्रुतं सोमं पुनीतन॥ मध्यावा [illegible] यावता
मधु॥ प्रजापते न त्वदेता०॥ ऋक्॥ उक्षान्नमीमदंत ह्यव प्रिया अधू
(१A) षत॥ अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विंद्रते हरी॥ इत्यस्य वि४
नांदीश्राद्धस्य प्रतिष्ठाफलसिद्ध्यर्थं द्राक्षामलकद्रव्यं दक्षिणां दा
तुमहमुत्सृजे॥ मातापितामहीचैव तथैव प्रपितामही॥ एते भवंतु सु
प्रीताः प्रयच्छंतु च मंगलं॥ इळामग्नेपुरुदंसंसनिं०॥ ऋक्॥ अने
न नांदीश्राद्धेन नांदीमुखदेवताः प्रियंतां [illegible] वर्द्धिः॥ ततः किंचिद्र
व्यं इळामग्न इति मंत्रेण संघट्टयन् शब्दयेत्॥ नंदिनी नलिनी
मैत्रा उमा च पशुवर्धिनी भगवती अविघ्नकरशं जातिक्यं अ
भ्यंगं हरिद्रा तैलं उष्णोदके स्नात्वा॥ महावेप्रतिष्ठा०॥ समुद्र
पितापितामहश्चैव तथैव प्रपितामहः॥ मातामहस्तत्पिता च प्रमातामहकादयः॥ ×५

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

९

ज्येष्ठा०॥ ऋ १ आपो हि ष्ठा० १ गंधद्वारां० ऋ १ दधिक्राव्णो अका०॥
ऋ॥ काण्डात्काण्डात्प्ररो०॥ ऋ १ न हि तेन मः॥ सर्वोपचारार्थे अक्षतान्सम
(१०) र्पयामि॥ गृहा वै० तदस्तु० या ओषधी० आपो दिव्या०॥ ऋ १ आपो हि ष्ठा० गंधद्वारां०
दधिक्राव्णो० ऋ १ काण्डात्काण्डात्प्र० ऋ १ गृहा वै प्रतिष्ठा० ऋ १ तदस्तु० ऋ १ या
सां राजा० ऋ १ आपो हि ष्ठा० गंधद्वारां० ऋ १ दधिक्राव्णो अका० ऋ १ का
ण्डात्काण्डा० ऋ १ गृहा वै प्रतिष्ठा० ऋ १ तदस्तु० ऋ १ यासु राजा वरु० ऋ १ आ
पो हि ष्ठा० ऋ १ गंधद्वारां० ऋ १ दधिक्राव्णो० ऋ १ काण्डात्काण्डा० ऋ १ गृहा वै प्रति
ष्ठा० ऋ १ तदस्तु० ऋ १ समुद्रज्येष्ठा० ऋचा चार ४ आपो हि ष्ठा० ऋ १ गंधद्वारां० ऋ १
दधिक्राव्णो० ऋ १ काण्डात्काण्डा० ऋ १ भगवती लक्ष्मी॥ नंदिन्यादि आविघ्नसंज्ञ
गणपतीभ्यो नमः सर्वोपचारार्थे अक्षतान्समर्पयामि॥ आलेनं० ऋ १ मंत्रपु
ष्पं समर्पयामि॥ ॥६॥ श्री भवानीशंकरार्पणमस्तु॥ ०॥ ०॥ ०॥

१०

(11)

॥ अथ पुण्याहवाचनसमाप्त ॥

श्रीभवानिप्रसन्न श्रीविरूपुरुषायनमः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com